कर्कटशृङ्गी च स्यात् कुलीरविषाणिका। अजशृङ्गी च वक्रा च कर्कटाख्या च कीर्त्तिता। शृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान्। श्वासोर्द्ध्ववाततृट्कास हिक्कारुचिवमीन् हरेत्” भावप्र० तद्गुणादि उक्तम्

**कर्कटाक्ष** पु० कर्कट इवाक्षि ग्रन्थिभेदोऽस्य। कर्कव्याम् (कांकुड) रत्नमाला। [ शृङ्गग्राम् भावप्र०।

**कर्कटाख्या** स्त्री कर्कटस्याख्याख्या यस्याः। (काकडाशिङ्गा)

**कर्कटाङ्गा** स्त्री कर्कटस्याङ्गं शृङ्गमिव शृङ्गमग्रमस्याः अजा० टाप्। शृङ्गग्राम्। राजनि०। [विल्वहृक्षे राजनि०।

**कर्कटाह्व** पु० कर्कटमाह्वायते कण्टकारत्वात् आ+ह्वे—क।

**कर्कटि** स्त्री कर्कं कण्टकमटति इन् शक०। (काँकुड) १एर्वारौ शब्दचि०। वा ङीप् अत्रार्थे, २शाल्मलीवृक्षे ३कर्कटशृङ्ग्याञ्च। मेदि०।

**कर्कटिनी** स्त्री कर्कटस्तदाकारोऽस्त्यस्याः इनि ङीप्। दारुहरिद्रायाम् राजनि०। [ शब्दरत्ना०।

**कर्कटु** पु० कर्क— उगया० नि०। (कर्कटिया) पक्षिभेदे

**कर्कन्धु** स्त्री कर्कं कण्टकं दधाति धा—कू नि०मुम्। १वदर्य्याम् (कुल) “कर्कन्धूफलमुच्चिनोति शवरी मुक्ताफलाशङ्कया” सा०द०। तस्य पुस्त्वमपि। “पुंसि स्त्रियाञ्च कर्कन्धूर्वदरी कोलमित्यपि। फेनिलं कुवलं घोटा सौवीरं वदरं महत्। अजप्रिया कुहा कोलो विषमोभयकण्टका। पच्यमानं सुमधुरं सौवीरं वदरं महत्। सौवीरं वदरं शीतं भेदनं गुरु शुक्रलम्। बृंहणम्पित्तदाहास्रक्षयतृष्णानिवारणम्। सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते। कोलन्तु वदरं ग्राहि रुच्यमुष्णञ्च वातलम्। कफपित्तकरञ्चापि गुरु सारकमीरितम्। कर्कन्धूः क्षुद्रवदरं कथितं पूर्व्वसूरिभिः। अम्लं स्यात् क्षुद्रवदरं कषायं मधुरं मनाक्। स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्। शुष्कं भेद्यग्निकृत्सर्वं लघु-तृष्णाक्लमास्रजित्” फले न०। “दघ्नोरूपं कर्कन्धूनि” यजु० १९,२३, कर्कन्धूनां पाकः पील्वादि० कुणच्। कर्कन्धूकुण तत्पाके न०। प्रस्थपरे कर्क्यादि० कर्कन्धूप्रस्थइत्यादौ नाद्युदात्तता। ततः मध्वा० चतुरर्थ्यां मतुप्। कर्कन्धूमत् तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप्। कर्कन्धूमती। तस्या अदूरभवः सुवास्त्वा० अण्। कार्कन्धूमत तददूरदेशभवे त्रि०।

**कर्कफल** न० कर्क—हासे अच् कर्कं प्रकाशान्वितं सत् फलति फल-अच्। क्षुद्रामलके राजनि०।

**कर्कर** पु० कर्क—हासे—अरन्। १दर्पणे, मेदि० २चूर्णसाधने क्षुद्रपाषाणखण्डे कङ्करे, (काँकर)। कर्क—घञ् कर्कं हासं राति—रा—क। ३दृढे ४कठिने त्रि० मेदि०। “किंनो वर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते” अमरुश०। “करीरः कर्करोऽर्कक्” माघः। ३मुद्गरे शब्दचि०।

**कर्कराङ्ग** पु० कर्करइवाङ्गं यस्य। खञ्जने कालकण्ठविहङ्गमे शब्दमा०।

**कर्कराटु** पु० कर्कं हासं रटति रट-कु। कटाक्षे जटाधरः।

**कर्कराटुक** पु० कर्कं कठिनं रटति रट—उकञ्। (करकटिया) विहभेदे शब्दर०।

**कर्करान्धुक** पु० कर्करः कठोरः अतिशयितान्धाकारवत्त्वात् अन्धुः कूपः संज्ञायां कन्। अत्यन्तान्धकारवति कूपे। त्रिका०।

**कर्कराल** पु० कर्करः सन् अलति अल—अच्। चूर्णकुन्तले हेमच०। तस्य इतरकेशापेक्षया कठिनत्वात्तथात्वम्।

**कर्करिका** स्त्री कर्कर इवास्त्यस्याः अच् संज्ञायां कन् अत इत्त्वम्। नेत्रखर्जूभेदे शब्दचि०। तत्र हि नेत्रे कङ्करयुक्ततेवोपलभ्यत इति तस्यास्तथात्वम्।

**कर्करी** स्त्री कर्कं हासं राति रा-क गौरा० ङीष्। (झारी) १सनालपात्रे, अमरः कन्दोर्घ्टतादिपक्वनिष्काशनसाधने (आजरा)२द्रव्ये च शब्दचि०। कर्कं राति रा—ईकक्। कर्करीकोऽप्यत्र। कर्करी+स्वार्थे कन् न ह्रस्वः कर्करीका तत्रार्थे स्त्री। [उज्ज्वल०।

**कर्करीक** न० कर्क—फर्फरीका० ईकन् नि०। शरीरे

**कर्करेट** पु० कर्कं कर्कैति शब्दं रेटत्यस्मात् रेट—अपादाने घञ्। अर्द्धचन्द्रे गलहस्ते (गलाटिपि) गलामर्दने हि कर्कशब्दकरणात्तस्य तथात्वम्।

**कर्करेटु** पु० कर्कैति शब्दं रेटति उन् उप० स०। (करकटिया) पक्षिभेदे अमरः।

**कर्कश** पु० हन् हिंसायां णिच् कः सन्+कशति—कर्क-अच् कर्क+लोमादि० श, करे कशति कश—शब्दे अच् शक० वा। १काम्पिल्लवृक्षे (गुड़ारोचनी) अमरः। २कासमर्दे। (कालकासेन्दा) ३इक्षुवृक्षे ४खड्गे च हेम०। ५साहसिके कठोरे च त्रि० अमरः “वेणुकर्कशपर्वया” रघुः। “ऐरावतास्फालनकर्कशेन” कुमा०। “कृष्णा स्तब्धावलिप्ता वा जिह्वा शूना च यस्य वै। कर्कशा वा भवेद्यस्य सोऽचिरात्दिजहात्यसून्” सुश्रु०। कर्कशं परिजीर्णञ्च कृमिजुष्टमदेशजम्। वर्जयेत् पत्रशाकन्तत्” सुश्रु० ‘सुरद्विपास्फालन-